R1000043

# SANSKRIT

*Maximum Marks: 80*
*Time Allotted: Three Hours*
*Reading Time: Additional Fifteen minutes*

## Instructions to Candidates

1. You are allowed an **additional fifteen minutes** for **only** reading the question paper.
2. You must **NOT** start writing during reading time.
3. This question paper has **4 printed pages**.
4. There are **three** sections in the paper: **A, B and C.**
5. There are **eleven questions** in the paper.
6. Answer ***all*** questions in **Sections A** and **B** and **any four** questions in **Section C.**
7. The intended marks for questions are given in brackets [ ].

## Instruction to Supervising Examiner

1. Kindly read **aloud** the Instructions given above to all the candidates present in the examination hall.

Downloaded From www.icseboard.org

## SECTION A – 18 MARKS

*Answer all questions.*

**Question 1**

(i) Disjoin Sandhis of *any three* of the following words. **[3]**

अधोदत्तानां केषाञ्चित् त्रयाणां शब्दानां सन्धिविच्छेदं कुरुत।

अस्त्यत्र, राजर्षि, देवा गच्छन्ति, पुत्रेति, तच्च

(ii) Expound *any three* of the following words, giving the names of the compound. **[3]**

अधोलिखितानां केषाञ्चित् त्रयाणां समस्तपदानां विग्रहं कृत्वा समासस्य नामापि लिखत।

परमोदारः, आत्मज्ञानम्, बहुव्रीहिः, पञ्चपात्रम्, शीतोष्णम्

(iii) Split *any three* of the following words. **[3]**

अधोलिखितानां केषाञ्चित् त्रयाणां पदानां प्रकृतिप्रत्ययविभागं कुरुत।

श्रोतव्य, पातुम्, लब्ध्वा, जानन्, वर्धमान

(iv) Change the voice of *any three* of the following sentences. **[3]**

अधोलिखितानां केषाञ्चित् त्रयाणां वाक्यानां वाच्यं परिवर्तयत।

(a) अस्माभिः गीता पठ्यते।

(b) ते प्रतिदिनं कथां शृण्वन्ति।

(c) सा अत्र आसने उपविशति।

(d) मम जनकः ब्राह्मणेभ्यः वस्त्राणि ददाति।

(e) त्वया अद्य लेखः लिखितः वा ?

(f) अहं बहूनि कार्याणि कृतवान्।

**Question 2** **[6]**

Translate the following passage into Sanskrit.

अधोलिखितस्य अनुच्छेदस्य संस्कृतभाषया अनुवादं कुरुत।

There were two brothers in a village who earned a living by selling firewood in the market. Every day, they went to the forest to chop firewood. One day as they were about to cut a tree, it spoke and requested them not to cut it. It gave them two gold apples in exchange. However, the brothers felt disappointed with the number of apples and decided to cut down the tree anyway. As they lifted their axes, the tree threw needles at them and punished them for their greed.

Downloaded From www.icseboard.org

## SECTION B – 34 MARKS

*Answer all questions.*

### Question 3

Translate the following passages into English.

अधोलिखितयोः गद्यांशयोः आङ्गलभाषया अनुवादं कुरुत।

(i) चन्द्रापीडोऽपि तत्रैव शिलातले, निरभिमानताम् अतिगम्भीरतां च कादम्बर्याः,निष्कारणवत्सलतां महाश्वेतायाः, अतिसमृद्धिं च गन्धर्वराजलोकस्य मनसा भावयन्, केयूरकेण संवाह्यमानचरणः, क्षणादिव क्षणदां क्षपितवान् । अथ समुद्गते सवितरि शिलातलात् उत्थाय चन्द्रापीडः **प्रक्षालितमुखकमलः**, **कृतसन्ध्यानमस्कृतिः** गृहीतताम्बूलः " केयूरक! विलोकय, देवी कादम्बरी प्रबुद्धा वा न वा ? क्व सा तिष्ठति ?" इत्यवोचत्। गतप्रतिनिवृत्तेन च तेन "देव! मन्दरप्रासादस्य अधस्तात्, **अङ्गणसौधवेदिकायां** महाश्वेतया सह अवतिष्ठते" इत्यावेदिते, ताम् आलोकितुम् आजगाम्। [6]

(ii) अथ महाश्वेता कादम्बरीम् अनामयं पप्रच्छ। सा तु सखीप्रेम्णा गृहनिवासेन कृतापराधेव लज्जमाना कृच्छ्रादिव कुशलम् आचचक्षे । मुहुर्तापगमे च महाश्वेता ताम्बूलदानोद्यतां ताम् षत्-"सखि कादम्बरि, सर्वाभिरस्माभिः अयम् अभिनवागतः चन्द्रापीडः आराधनीयः। तदस्मै तावत् दीयताम्'' इति । इत्युक्ता सा शनैः अव्यक्तमिव "सखि, लज्जेहऽम् अनुपजातपरिचया गल्भ्येनानेन । गृहाण त्वमेव अस्मै प्रयच्छ'' इत्युवाच। पुनः पुनः **अभिधीयमाना** च तया ग्राम्येव चिरात् दानाभिमुखं मनश्चक्रे । चन्द्रापीडस्तु स्वभावपटलं **धनुर्गुणाकर्षणकृतकिणश्यामलं** पाणिं प्रसार्य ताम्बूलं प्रतिजग्राह। [6]

### Question 4

Translate the following verses into English.

अधोलिखितयोः पद्यांशयोः आङ्गलभाषया अनुवादं कुरुत।

(i) स वेलावप्रवलयां **परिखीकृतसागराम्**। [7]
अनन्यशासनामुर्वीं **शशासैकपुरीमिव**॥
तस्य दाक्षिण्यरूढेन नाम्ना मगधवंशजा।
पत्नी **सुदक्षिणेत्यासीदध्वरस्येव** दक्षिणा॥ 30-31

(ii) लोकान्तरसुखं पुण्यं तपोदानसमुद्भवम्। [7]
सन्ततिः **शुद्धवंश्या** हि परत्रेह च शर्मणे॥
तया हीनं विधातर्मां कथं पश्यन् न दूयसे।
सिक्तं स्वयमिव स्नेहाद् **वन्ध्यमाश्रमवृक्षकम्**॥ 69-70

Downloaded From www.iscboard.org

### Question 5

Explain the following with reference to the context.

अधोलिखितयोः उद्धरणयोः **सन्दर्भप्रसङ्गाभ्यां** सह व्याख्यां कुरुत।

(i) अहो मे निरर्थकव्यापारेषु अभिनिवेशः। अहो मे मूर्खतायाः प्रकारः ........। **[4]**

(ii) "**स्वस्यैवाविनयस्य** फलम् अनेनानुभूयते" इत्यवोचत्। **[4]**

## SECTION C – 28 MARKS

*Answer any four questions.*

### Question 6 [7]

चन्द्रापीडस्य जन्मवृत्तान्तेन सह तस्य असाधारणान् गुणानपि विवृणुत।

### Question 7 [7]

को नाम राजा तारापीडः? कस्मै चासौ राज्यभारं दत्त्वा सुखेन उवास? कथं च स पुत्रसुखं लेभे?

### Question 8 [7]

ऋषेः जाबालेः आश्रमस्य वर्णनं कृत्वा तत्रस्थानां ऋषीणां हारीतेन सह जातं सम्वादं लिखत।

### Question 9 [7]

राजा दिलीपः किमर्थं सन्तानसुखं न प्राप्तवान्? महात्मना वशिष्ठेन उक्तं कारणं विस्तरेण लिखत।

### Question 10 [7]

यदा महर्षिः वशिष्ठः राजानं दिलीपं तस्य कुशलम् अपृच्छत् तदा दिलीपः स्वगुरुं प्रशंसन् किं किम् अभणत्?

### Question 11 [7]

राजा दिलीपः किमर्थं प्रसिद्धः आसीत्? तस्य प्रसिद्धौ हेतुभूतान् असामान्यान् गुणान् लिखत।



Downloaded From www.icseboard.org